# Akshamalastutih

# અક્ષમાલાસ્તુતિઃ

## Document Information

Text title : akShamAlAstutiH

File name : akShamAlAstutiH.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Author : Kavi Dvijendra

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# અક્ષમાલાસ્તુતિઃ

શ્રીગાયત્રીં ત્રયીં વિદ્યાં પ્રણમ્ય પરમેશ્વરીમ્ ।
“અક્ષમાલા-સ્તુતિં” દિવ્યાં કરોમિ સુખદાં સતામ્ ॥ ૧॥

અથાઽવ્યક્તાઽઽદિશક્તિર્યા મહાદેવીન્દિરેશ્વરીમ્ ।
ઉમોર્ધ્વકેશી ઋગ્વેદા “ઋ”રૂપા ઋદ્ધિદાયિની ॥ ૨॥

ઌપ્તધર્માઽસ્તિ “ઌ”નામ્ની ત્વેકાક્ષરવિહારિણી ।
ઐન્દ્રી હ્યોઙ્કારરૂપા યા ચૌપાસનફલપ્રદા ॥ ૩॥

અણ્ડમધ્યસ્થિતા દેવી “અ”કારમનુરૂપિણી ।
ષોડશીં લોકપૂજ્યાં તાં સર્વદા સંસ્મરામ્યહમ્ ॥ ૪॥

તતો વ્યઞ્જનવર્ણસ્થાં કમલાં ખગવાહનામ્ ।
ગઙ્ગાં ચ ધર્મદાં દેવીં “ઙ”ક્ષરાં પ્રણમામ્યહમ્ ॥ ૫॥

ચણ્ડિકાં સતતં વન્દે દેવીં છન્દોઽનુગાં પરામ્ ।
જયન્તીં ક્ષણનિર્ઘોષાં “ઞ”રૂપ-વૃષવાહનામ્ ॥ ૬॥

ટઙ્કવર્ણાન્વિતાં દિવ્યાં “ઠ-ઠ”શબ્દ-નિનાદિનીમ્ ।
ડમરૂભૂષણાં દેવીં ઢક્કાહસ્તાં નમામ્યહમ્ ॥ ૭॥

“ણ”વર્ણરૂપિણીં દિવ્યાં તપ્તકાઞ્ચનભૂષણામ્ ।
થાવરાં સતતં વન્દે દણ્ડકારણ્યવાસિનીમ્! ॥ ૮॥

ધર્મશીલાં નદીરૂપાં પરબ્રહ્માત્મિકાં તથા ।
ફલદાં બહુનેત્રાં ચ ભવાનીં પ્રણતોઽસ્મ્યહમ્ ॥ ૯॥

માલિની તાં મહામાયાં પઞ્ચવિંશતિવર્ણિકામ્ ।
નત્વા પુનઃ સ્મરામ્યત્ર યક્ષવર્ણાત્મિકાદ્ભુતામ્ ॥ ૧૦॥

યક્ષિણાં યોગમાયાં તાં રામાં લક્ષ્મીં સુખપ્રદામ્ ।
વરદાં શારદાં દિવ્યાં ષણ્મુખીં ચ સરસ્વતીમ્ ॥ ૧૧॥

હરિ-રુદ્રપ્રિયાં દેવીં ક્ષમાશીલાં નવાત્મિકામ્ ।
પઞ્ચાશદ્વર્ણરૂપાં તાં સ્મરામિ સર્વદા શુભામ્ ॥ ૧૨॥

યસ્ય સ્મરણમાત્રેણ પ્રસન્નાં વર્ણમાત્રિકા ।
સમ્ભૂયાત્ સા સદા લોકે સર્વમઙ્ગલકારિણી ॥ ૧૩॥

નેત્રદ્વયખયુગ્મેઽબ્દે શ્રી દ્વિજેન્દ્રવિનિર્મિતા ।
જ્યેષ્ઠમાસેઽત્ર કાશ્યાં વૈ પ્રોદ્ભૂતા સાઽક્ષમાલિકા ॥ ૧૪॥

ઇતિ રત્નમયીં દેવીં ગાયત્રીતુષ્ટિકારિણીમ્ ।
સ્તુતિં પઠેન્નરો નિત્યં બ્રહ્મસાયુજ્યમાપ્નુયાત્ ॥ ૧૫॥

ઇતિ શ્રીગાર્ગ્યમુનિ દ્વિજેન્દ્રકવિકૃતા અક્ષમાલાસ્તુતિઃ સમ્પૂર્ણા ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

---

*Akshamalastutih*
pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*